International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 117-119
© 2025 IJMH
www.themultijournal.com
Received: 01-12-2025
Accepted: 26-12-2025
Publish : 27-12-2025

**डॉ. गुन्जन शर्मा**
राजकीय अध्यापिका,
चूरु

**Correspondence:**
**डॉ. गुन्जन शर्मा**
राजकीय अध्यापिका,
चूरु

# उत्तररामचरिते वासन्तीचरित्रनिरूपणम्

**डॉ. गुन्जन शर्मा**

**विषयसारः-**
प्रबन्धेऽस्मिन्करुणारसप्रियधर्मपरायणोदुम्बरवंशीयमहाकविभवभूतिकृतोत्तरराम-चरिते वासन्तीचरित्रस्य निरूपणं वर्तते। नाटके यथा मुख्यपात्रयोजना परमावश्यकी भवति तथैव गौणपात्रयोजनाऽपि महत्यावश्यकीति भवभूतिविरचितरामचरिते प्रस्फुट्यते। गौण-पात्रेष्वेव सीतासखीत्वेन भवभूतिना करुणरसपरिस्फुटनाय वनदेवीरूपेण वासन्तीचरित्रं न्यरूपि। तत्रोत्तररामचरिते छायानामकतृतीयाङ्केऽतीवप्रसिद्धचरित्रमिदं वरीवर्ति। तस्य चरित्रस्य नाटके कथं प्रतिपादितं तत्सर्वमत्र प्रतिपाद्यते। तस्याः वासन्त्याः के गुणाः अस्मिन्नाटके वर्तन्ते तदप्यालोच्यते।

**कुटशब्दाः-** वासन्ती, उत्तररामचरितम्, सीता इत्यादयः।

संस्कृतनाट्यसाहित्ये विश्वविश्रुतो धर्मपरायणश्चतुर्षु वेदेषु षडङ्गेषु च विचक्षणः उदुम्बरवंशीयब्राह्मणकुलप्रादुर्भूतमहाकविभवभूतिस्सुप्रसिद्ध एव। महाकविभवभूतिविरचि-तेषु त्रिषु नाटकेषु महावीरचरित-मालतीमाधव-उत्तररामचरिताख्येषु तज्जीवनविषये विवरणं प्राप्यते। ज्ञानस्य निधिस्वरूपो ज्ञाननिधिर्महाकवेर्भवभूतेर्गुरुरासीत्। एतद्विषये महावीरचरिते युक्तमेवोक्तम्-

**श्रेष्ठः परमहंसानां महर्षीणां यथाङ्गिराः।**
**यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥**[१]

भवभूतिविषये महावीरचरितस्य प्रस्तावनायामेतदपि प्रतिपाद्यते **यदमुष्यायणस्य तत्र भवतो वाजपेयेयाजिनो महाकवेः पञ्चमस्सुगृहीतनाम्नो भट्टगोपालपौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसम्भवः श्रीपदलाञ्छनः पदवाक्यप्रमाणज्ञः भवभूतिर्नाम जतुकर्णीपुत्रः।**[२]

महावीरचरितानुसारं भवभूतिनामप्रसिद्धिगतो विद्वान् श्रीकण्ठपदलाञ्छनः आसीत्। वीरराघवेऽपि कथितम्- **श्रीकण्ठपदलाञ्छनः। पितृकृतनामेदम्। भवभूतिर्नाम साम्बा पुनातु भवभूतिपवित्रमूर्तिः श्लोकरचनासन्तुष्टेन राज्ञा भवभूतिरिति ख्यापितः।**[३]

पितृपरम्परया भवभूतिना विद्वत्ताऽधिगताऽऽसीत्। भवभूतिस्सर्वशास्त्रेष्वप्रतिहत-गतिरासीत्। वाणी अनुचरी इव भवभूर्तिं महाकविमनुसृतवती। भवभूतिना गूढशास्त्राणां सम्यगध्ययनं कृतमासीत्। ऋग्वेदाथर्ववेदयोः पाण्डित्यमपि भवभूतिरचनासु दरीदृश्यते। शोधप्रबन्धेऽस्मिन्नेतद्विषये प्रमाणान्यनेकानि स्थाने-स्थाने दरीदृश्यन्ते।

महाकवेरस्य शैल्यपि वैदिकशैलीमाश्रित्य विद्यते। तथा ह्युत्तररामचरिते दृश्यते-

**अक्षरं ते ज्योतिः प्रकाशताम्।**
**स त्वा पुनातु देवः परो रजा य एष तपति॥**[४]

भवभूतिस्स्वजीवनकाले यथेष्टं सम्मानं नालभत। अस्मात्कारणाद्दुःखितस्स आत्मानं स्वरचनास्वभिव्यञ्जितवान्। तेन सार्धमेव स आशान्वितोऽप्यासीद्भविष्यति समानधर्मजनने। उक्तन्तु मालतीमाधवे-

**ये नाम केचिदिह नः प्रथयन्त्यवज्ञां**
**जानन्ति ते किमपि तान् प्रति नैष यत्नः।**
**उत्पत्स्यते हिममकोऽपि समानधर्मा**
**कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥**[५]

भवभूतिः कालिदासपरवर्तित्वेन वाक्पतिराजसमकालिकत्वेन राज-तरङ्गिण्यामुल्लि-ख्यते। गौडवहोनाभिग्रन्थे वाक्पतिराजो भवभूतिं भूरिशः प्रशशंस। भवभूतेस्स्थितिर्वाक्प-तिराजतः पूर्ववर्तीत्यनेन परिज्ञायते। गौडवहोकाव्यस्य ८३२ तमगाथायां सूर्यग्रहणस्योल्ले-खोऽस्ति। जैकोबी-महोदयेनैतत्सूर्यग्रहणं ७३३ ईसवीयवत्सरस्या-ऽगस्तमासस्य चतुर्दशे दिनाङ्केऽभूत्। भवभूतिस्त्वेतत्सूर्यग्रहणा-त्पूर्वमेवासीत्।

महाकविभवभूतिविषये स्थितिकालादिसम्बद्धविचाराः वेबर-श्रीएदेर-मैक्समूलर-मैक्डानल-विन्सेण्टस्मिथादिभिः पाश्चात्यविद्व-द्भिस्सम्यक्प्रास्ताविषत। महाकविभवभूतिना त्रीणि नाटकानि व्यरचिषत–

**१. महावीरचरितम् २. मालतीमाधवम् ३. उत्तररामचरितम्**

उत्तररामचरितं भवभूतेः श्रेष्ठं नाटकमस्ति, यस्मिन्तस्य नाट्यकला कवित्वशक्तिश्च चरमपरिणतिमाप्नोत्। उत्तररामचरिते भवभूतेः कला सर्वातिशायिनी वर्तते। एतन्नाटकं करुणरसस्य श्रेष्ठं नाटकं मन्यते। अस्य कथानकं प्रख्यातमेतिहासिकञ्चास्ति। नेता रामोऽस्ति यश्च धीरोदात्तोऽस्ति नायिका सीता च सरला सुशीला विद्यते। करुणरसस्यात्र प्राधान्यन्दरीदृश्यते।

उत्तररामचरितस्य सर्वेऽङ्काः घटनादृष्ट्या सम्बद्धास्सन्ति। कथावस्तुदृष्ट्याऽप्यङ्काना-मेतेषां महत्त्वमस्ति। नान्दीपाठकविप-रिचयमानन्तरमेतत्सूचितं प्रस्तावनायां यद्राज्याभि-षेककाले समागता ऋषयस्सत्कारपूर्वकं प्रत्यावर्तिताः। जनके प्रस्थिते सति दुःखातुरसीतां सान्त्वयितुं रामो वासगृहं प्रविशति। सीतायास्सम्बन्धे लोकापवादस्य सूचना दुर्मुखनामाचारेण प्रदीयते। एतद्वाग्वज्रप्रहारेण रामो मूर्च्छितो भवति। ततश्चाऽऽश्वस्तो भूत्वा लोकाराधनाय सीतायाः निर्वासस्य निश्चयङ्करोति।

उत्तररामचरितस्य प्रथमे द्वितीये चाङ्के द्वादशवर्षाणि व्यतीतानि। विष्कम्भके त्वात्रेयीवासन्त्योस्संवादेन महाकविभवभूतिरेतेषु द्वादशवर्षेषु घटितानां सूचनां प्रादात्। भवभूतेस्तु वैशिष्ट्यमुत्तर-रामचरिते परिलक्ष्यते।'

उत्तरामचरितस्य तृतीयेऽङ्के विष्कम्भकमाध्यमेन तमसामुरलान-दीदेवता संवादेन कुशलवयोर्विषये सूचना प्राप्यते। महर्षिवालमी-केस्तपोवनं निकषा सीतां परित्यज्य लक्ष्मणे निवर्तिते सति प्रसवपीडया ग्रस्ता सीताऽऽत्मानं गङ्गायां प्राक्षिपत्। तथैव सा शिशुद्वयं जनयामास। पृथ्वीभागीरथ्यौ सीतां रसातलमानीतवत्यौ। अनन्तरं शिशू उभौ महर्षिवा-ल्मीकये समर्पितौ गङ्गया। पञ्चवटीं प्रविष्टो रामस्सीतासहवासकालिकस्थानान्यवेक्ष्य मूर्च्छितो भवति, किन्तु तत्रादृश्यया सीतया स्वहस्तस्य शीतलस्पर्शाद्रामाय चेतनां प्रददाति। वनदेवता वासन्त्यपि राममुपगम्य सीतासम्बन्धे रामेण सह वार्ताङ्करोति। सीता-रामावुभावपि पृथक्पृथक्शोकविह्वलो भूत्वा विलापं कुरुतः। अन्ते तु रामोऽश्वमेघयज्ञानुष्ठा-नायाऽयोध्यां प्रति निवर्तते सीता च स्वपुत्रयोरन्तिकमुपयाति।

चतुर्थेऽङ्के विष्कम्भके वाल्मीकेः शिष्यद्वयेन दाण्डायनसौधातक्यो-र्वार्तालापेनैतत्सू-च्यते यद्वाल्मीकेराश्रमे वसिष्ठोऽरुन्धती रामस्य मातरो जनकश्चाऽतिथिरूपेण समागताः, किन्तु सीताशोकसन्तापितो राजर्षिजनक आश्रमाद्बहिर्वृक्षच्छायामाश्रित्य स्थितोऽस्ति।

अत्र वसिष्ठादेशेन कौशल्याऽरुन्धत्या सह जनकमुपगच्छति। तदानीङ्कौशल्या जनकश्चोभावपि सीताशोकविह्वलौ भवतः। एतस्मिन्नवसरे बालकानां कोलाहलः श्रूयते। तेषां बालकानां मध्ये रामसदृशं बालकमवेक्ष्य कौशल्या विस्मयोपेता भवति। स बालकस्त-त्राऽऽहूयते। वार्तालापे लवस्स्वरामायणज्ञानस्य परिचयं प्रस्तौति। जनकेन दशरथपुत्राणां सन्ततिविषये पृष्टे सति सस्स्वकीयामनभिज्ञतां प्रकटयति।

अवसरेऽस्मिन् कौहलोत्सुकबालकैर्लवस्तत्र नीयते यत्राऽश्वमेध-स्याश्वस्तद्रक्षकैः परिवृतः आसीत्। विवादे उपस्थिते सति लवो युद्धाय सन्नद्धो भवति।

पञ्चमे अङ्के युद्धे लवेन सैनिकाः पराजितत्वात्पलायिताः। चन्द्रकेतौ तत्रोपस्थिते सति लवचन्द्रकेत्वोर्मध्ये संवादो भवति। बालिवधादिविषये लवस्याक्षेपं परिज्ञाय क्रुद्धो वीरश्चन्द्रकेतुर्युद्धाय कृतनिश्चयो दृश्यते। विष्कम्भके विद्याधरविद्याधर्योस्संवादमाध्यमेन लवकुशयोर्दिव्यास्त्रैर्युद्धसूचना प्राप्यते। एवञ्च मूलनाटके गङ्गापृ-थिवीभ्यां सहिता सीता जलान्निष्क्रमणे साक्षात्क्रियते। सीता स्वस्पर्शेण रामस्य मूर्च्छामपनयति। नाटकान्ते सीता-राम-कुश-लवानां समागमो भवति।'

इत्थमस्मिन्नाटके वनदेवीत्वेन वासन्तीचरित्रं सम्यक्तया न्ययोज-यद्भवभूतिमहा-कविः। भवभूतेरुत्तररामचरिते चरित्रमिदन्दृश्यते। उत्तररामचरिते वासन्त्याः विशेषस्थानं वर्तते। नाटके वासन्त्याः करुणत्वस्य स्त्रीस्नेहपरायणस्य धर्मपरायणस्य परिचयो लभ्यते।

तथा च तृतीयाङ्कारम्भे एव सीतायाः दीनदशां स्मरन्ती विलपति- **सा चापि दुर्गतिसखी जननीव वासन्ती विलप्यते**[६] इति भवभूतिना तमसामुखेन प्रतिपाद्यते।

पुनश्च गजशावकं प्रत्यपि तस्याः कारुण्यन्दृश्यते एव। अत एव रामं प्रति वदति- **देव! त्वर्यतां त्वर्यताम्। इतो जटायुशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य सम्भावयतु देव्याः पुत्रकं देवः।**[७]

एवमेव तस्याः करुणार्द्रचित्तस्य परिचयोऽनेनापि लभ्यते यदा रामस्सीतां संस्मर्य शोकविह्वलोऽभूत्तदा सापि शोकान्विताऽभवत्। पुनश्च चातुर्यस्य परिचयन्दत्त्वा विषयान्त-रमाश्रितवती। तथा च भवभूतिना प्रत्यपादि-

**कष्टमभ्यापन्नो देवः। तदन्यतः क्षिपामि तावत्।**[८]

सा च मातृवत्स्नेहवत्सलाऽप्यासीदत एव सीतापोषितमयूरस्य सादृश्यं वर्णयन्ती कथयति-

**अनुदिवसमवर्धयत्प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हम्।**
**मणिमुकुट इवोच्छिखः कदम्बे नदति स एष वधूसखः शिखण्डी॥**[९]

तस्यास्सखीस्नेहत्वमपि भवभूतिना छायाङ्के वारं वारं प्रस्फुट्यते। एवञ्च वासन्ती वारं वारं वदति- **अयि देव! किमिति मर्मच्छे-ददारुणैरेभिः प्रलापैः प्रियसखीदुःखदुग्धामपि मां पुनर्मन्दभाग्यां दहसि।**[१०]

पुनश्च वदति-

**स्नेनैव लोकोत्तरेण धैर्येण संस्तम्भयाति भूमिं गतमात्मानम्। कुत्र मे प्रियसखी?**[११]

सखीविषये चिन्ताविह्वलाऽप्यासीत्। अत एव रामं प्रति पृच्छति- **भवता परिणीतमपि किम्?**[१२]

सा पुनः नीतिज्ञाऽप्यासीत्। अतश्च रामं प्रति स्वनीतिज्ञत्वं प्रदर्श्य वदति- **महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं पुनर्यथा कार्यहानिर्न भवतु तथास्ताम्।**[१३]

## ❖ उपसंहारः-

इत्थङ्करुणारसप्रियभवभूतिस्स्वनाटके करुणारसप्रस्फुटनाय वासन्तीचरितमाश्रित-वान्। तत्राधाक्येन करुणरस एव दरीदृश्यते। पुनश्च न केवलङ्कारुण्यम्, एकस्य चरित्रस्य कृते यद्यदपेक्ष्यते तत्सर्वमपि प्रतिपाद्यते। तस्याश्चरित्रे च कारुण्येन साकं धैर्यशालित्वस्य नीतिपरायणत्वस्य सखीस्नेहत्वस्य विचारपरायणस्य विचक्षणत्वस्य परिचयस्सम्प्राप्यते इति शम्।

## ❖ सन्दर्भग्रन्थसूची-


१. **रत्नावली।** श्रीहर्षः। चौखम्बासुरभारतीप्रकाशनम् :वाराणसी, २००३

२. **रघुवंशम्।** कालिदासः। सं. एम.आर. काले। मोतीलालबनारसीदासः : दिल्ली, १९७२

३. **मालतीमाधवम्।** भवभूतिः। चौखम्बाविद्याभवनम् : वराणसी।

४. **मालतीमाधवम्।** भवभूतिः। चौखम्बासंस्कृतसीरीज : वाराणसी, १९७१

५. **रसार्णव सुधासागर।** शिङ्गभूपाल। चौखम्बासंस्कृतसीरीजआफिस: वाराणसी, वि.२०६०

६. **संस्कृत काव्यशास्त्र का इतिहास।** डा. उमाशंकर(ऋषि)। चौखम्बा संस्कृत प्रतिष्ठान : वाराणसी, १९९९

७. **अलङ्कारशास्त्र की परम्परा।** डा. राजवंशसहायः 'हीरा'। चौखम्बाप्रकाशनम् : वाराणसी

८. **अलङ्काररत्नाकरः।** शोभाकरमित्रः। ओरिएण्टल-बुक्-एजेंसी : पुना, १९८२।

९. **अलङ्कारशेखरः।** केशवमिश्रः। प्रका. जयकृष्णदासः एवं हरिदासगुप्तः। चौखम्बा संस्कृत सीरीज आफिस : बनारस

१०. **अलङ्कारसर्वस्वम्।** रुय्यकः। निर्णयसागरः : मुम्बई, सं- १८९३

११. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुरभारतीप्रकाशनम् : वाराणसी, २०१७

१२. **काव्यमीमांसा।** राजशेखरः। व्याख्या. यमुनारामत्रिपाठी। शारदासंस्कृतसंस्थानम्।

१३. **काव्यात्ममीमांसा।** डा. श्रीजयमन्तमिश्रः। चौखम्बासुरभारतीप्रकाशनम् : वाराणसी, प्रथमसंस्करणम्।

१४. **काव्यानुशानम्।** हेमचन्द्रः। सम्पा. पण्डितशिवदत्तशर्मा। गोपीनाथपुरोहितपुस्तकालयः : वनस्थली, विद्यापीठम्।

१५. **काव्यालङ्कारसूत्राणि।** वामनः। व्याख्या. श्रीहरगोविन्दशास्त्री। चौखम्बासुरभारतीप्रकाशनम् वाराणसी, संस्करणम्- २०१५


## संदर्भ

[१]महावीरचरितम्- १.५

[२]महावीरचरितम्, प्रस्तावना

[३]वीरराघवे प्रस्तावनायाम्

[४]उत्तररामचरितम्- ४

[५]मालतीमाधवम्, भूमिकायाम्

[६]उत्तररामचरितम्-३.१

[७]उत्तररामचरितम्-३.१६५

[८]उत्तररामचरितम्- ३.२०१

[९]उत्तररामचरितम्- ३.१७५

[१०] उत्तररामचरितम्- ३.२०८

[११] उत्तररामचरितम्- ३.२१४

[१२] उत्तररामचरितम्- ३.२२१

[१३] उत्तररामचरितम्- ३.२२२